## षष्ठः पाठः

# ज्ञानं पूततरं सदा

*[ प्रस्तुत शीर्षक पाठ '**कथासरित्सागर**' से लिया गया है। '**कथासरित्सागर**' कश्मीर के पण्डित **सोमदेव** की रचना है। सोमदेव कश्मीर के राजा अनन्त के आश्रित कवि थे। सम्भवतः 1063 ई० से 1081 के बीच सोमदेव ने इस ग्रन्थ की रचना की थी। 'कथासरित्सागर' अनेक कथाओं के अमृत की खान 'बृहत्कथा' नामक ग्रन्थ का सार है। मानवीय प्रकृति का परिचय, कथाओं के विषयों की व्यापकता और विभिन्नता, भाषा-शैली की सरलता, वर्ण्य-शक्ति का अनुपम सौन्दर्य एवं चातुर्यपूर्ण उक्तियाँ; ये सब कथासरित्सागर की प्रमुख विशेषताएँ हैं। कहानियों के भीतर कहानियाँ छिपी हुई हैं और आश्चर्यजनक रूप से एक के बाद एक कहानी उभरती हुई सामने आती है। यह कथाओं का ऐसा महान् सागर है जिसमें गोता लगानेवाले को काल्पनिक और वास्तविक जीवन के अनूठे चित्र और अनुभव प्राप्त होते हैं। मानव-जीवन में ऐसा कुछ भी नहीं है, जिसका किसी-न-किसी रूप में कथासरित्सागर की कहानियों के माध्यम से वर्णन न हो। ]*

पुरा दीपकर्णिरिति ख्यातो प्राज्यविक्रमः राजाभूत्। तस्य शक्तिमती नाम भार्या प्राणाधिकाऽभवत्। उद्याने सुप्तां तां भार्यां सर्पः दृष्टवान्। अथ तस्यां पञ्चत्वं गतायां तद्गतमानसः अपुत्रोऽपि स नृपः ब्रह्मचर्यव्रतं जग्राह। कदाचिद् राज्यार्हपुत्रासद्भावदुःखितं तं स्वप्ने भगवानिन्दुशेखरः इत्यादिदेश। "अटव्यां भ्राम्यन् सिंहारूढं कुमारकं द्रक्ष्यसि तं गृहीत्वा गृहं गच्छेः स ते पुत्रो भविष्यति। अथ प्रबुद्धः सः राजा तं स्वप्नं स्मरन् जहर्ष कदाचिद् मृगयारसात् दूरामटवीं ययौ। तत्र मध्याह्ने सः भूपतिः पद्मसरस्तीरे तपनतेजसं सिंहारूढं बालकं ददर्श। अथ राजा स्वप्नं स्मरन् अवतारित-बालकं जलाभिलाषिणं तं सिंहमेकशरेण जघान। स सिंहः तद्वपुस्त्यक्त्वा सद्यः पुरुषाकृतिः अभूत्। कष्टं किमेतद् ब्रूहीति राज्ञा पृष्टः जगाद भूपते। अहं धनदस्य सखा सातीनामा यक्षोऽस्मि। सोऽहं प्राग्गङ्गायां ऋषिकन्यकाम् अपश्यम्। ततो गान्धर्वेण विवाहेन मया भार्या कृता तद्बान्धवा तद् बुद्ध्वा तां च मां च क्रुधा अशपन् युवां सिंहौ भविष्यथः, मुनयः पुत्रजन्मावधिं तस्याः शापान्तं व्यधुः, मम तु त्वच्छराघातपर्यन्तम्। तदनन्तरम् आवां सिंहमिथुनं सञ्जातौ। सा पुत्रजन्मसमये दारके जाते एव व्यपद्यत। अयं मया अन्यासां सिंहीनां पयसा वर्धितो। अद्य त्वया बाणाहतोऽहं शापाद् विमुक्तोऽस्मि। तव मया दत्तममुं महासत्त्वं सुतं गृहाण। अयं ह्यर्थः पुरा तैः मुनिभिः समादिष्टः। इत्युक्त्वा तस्मिन् सातनाम्नि गुह्यके अन्तर्हिते स राजा तं बालं समादाय गृहं प्रत्याययौ। यस्माद् सातेन ऊढोऽभूत्तस्मात्तं सातवाहनं नाम्ना चकार कालेन चैनं राज्ये न्यवेशयत्। ततस्तस्मिन् क्षितीश्वरे दीपकर्णे अरण्यं गतेऽसौ भूपतिः सातवाहनः सार्वभौमो संवृतः। ततः कदाचिद् स राजा सातवाहनः वसन्तसमयोत्सवे देवीकृतं तदुद्यानं अध्यास्त। तत्र नन्दने महेन्द्र इव सुचिरं विहरन् वापीजले क्रीडितुमवतीर्णोऽभूत्। तत्र सहेलं दयिता करवारिभिः असिञ्चत्। ताभिः सोऽपि असिच्यत्। अथैका तस्य राज्ञः महिषी सुकुमाराङ्गी क्रीडन्ती क्लममभ्यगात्। सा राजानमब्रवीत्– मोदकैर्देव मां मा परिताडय। तच्छ्रुत्वा राजा द्रुतं बहून् मोदकान् आनयनादिदेश। ततो विहस्य सा राज्ञी पुनरेवमभाषत– राजन्! अत्र जलान्तरे मोदकानां कोऽवसरः 'त्वमुदकैः मा सिञ्च' इति मया त्वोक्तम्। त्वं कथमीदृशः मूर्खः यः माशब्दोदकशब्दयोः सन्धिमात्रं न जानासि न च प्रकरणं वेत्सि। शब्दशास्त्रविदा तया इत्युक्तः सः परिवारे अन्तर्हसन् लज्जाक्रान्तोऽभूत्। तत्क्षणं परित्यक्तजलक्रीडो वीतदर्पश्च जातावमानो निर्लक्षः निजमन्दिरं प्राविशत्। ततश्चिन्तापरो मुह्यन्नाहारादिपराङ्मुखः चित्रस्थ इव पृष्टोऽपि किञ्चिद् नैवाभाषत्। पाण्डित्यं शरणं वा मृत्युर्वेति-विचिन्तयन् शयनीयपरित्यक्तमात्रः सन्तापवानभूत्। अकस्मादथ राज्ञस्तथाविधामवस्थां दृष्ट्वा

किमेतदिति सर्वः परिजनो सम्भ्रान्तोऽभवत्। ततो गुणाढ्यः शर्ववर्मा च क्रमेण तामवस्थां ज्ञातवन्तौ। अस्मिन् काले न च स्वस्थो राजेत्यालोच्य तत्क्षणं राजहंसाख्यः राजचेटकः आहूतः। भूपस्य शरीरवार्तां पृष्टः सोऽब्रवीदिदं देवः पूर्वं कदाचन ईदृशो दुर्मना न दृष्टः। मिथ्यापण्डितया तया विष्णुशक्तिदुहित्रा विलक्षीकृतः अन्याः देव्यः इत्याहुः। तस्य राजचेटस्य मुखादेतत् श्रुत्वा शर्ववर्मा संशयादित्यचिन्तयत्। यदि राज्ञः व्याधिः भवेद् चिकित्सकाः प्रविशेयुः, यदि आधिर्न तत्रास्य कारणं नोपलभ्यते। यतः निहतकण्टके राज्येऽस्य विपक्षो नास्त्येव, प्रजाश्चैता अनुरक्ताः, न हानिः परिदृश्यते तत्कस्माद् प्रभोः सहसा ईदृशः खेदः स्यादेवं विचिन्तिते धीमान् शर्ववर्मेदमब्रवीत्। अहं जानाम्यस्य राज्ञः मौर्ख्यानुतापतः मन्युः। मूर्खोऽहमिति सदैवायं पाण्डित्यं वाञ्छति, मया पूर्वमेव चैष तदाशयः उपलब्धः तन्निमित्तं राज्ञया अवमानितश्चाद्य। एवमन्योन्यमालोच्य तं रात्रिमतिवाह्य शर्ववर्मगुणाढ्यौ प्रातःकाले महीपतेः वासवेश्म अगच्छताम्। अथ निकटे उपविश्य सः नृपः विज्ञप्तः अकारणं कथं देव विमना वर्तसे इति।

तच्छ्रुत्वापि स सातवाहनः तथैव तूष्णींमासीत्। ततः शर्ववर्मा इदमद्भुतं वाक्यमब्रवीत्– देव त्वया क्वापि श्रुतं स्यानमम प्रागुक्तं तेनाहमद्य निशि स्वप्नमाणवकं कृतवान्। स्वप्ने मया नभसश्च्युतमम्बुजं दृष्टं तच्च केनापि दिव्येन कुमारेण विकासितम्। ततश्च तस्माद् धवलाम्बरा दिव्या स्त्री निर्गता, सा च देव! समनन्तरमेव तव मुखं प्रविष्टा। इयम् दृष्ट्वा प्रबुद्धोऽस्मि मन्ये सा सरस्वती देवस्य वदने साक्षात् सम्प्रविष्टात्र संशयः न। तत्क्षणं शर्ववर्मणि एवं निवेदितस्वप्नेऽस्तमौनः सः सातवाहनः साकूतं मामवदत्। प्रयत्नेन शिक्षमाणः पुमान् कियता कालेन पाण्डित्यमधिगच्छति। एतन्मे त्वया कथ्यतां मम तेन बिना ह्येषा लक्ष्मीः न प्रतिभासते। काष्ठस्याभरणैरिव मूर्खस्य विभवैः किम्? ततो गुणाढ्येन सः विज्ञप्तः राजन्! द्वादशभिः वर्षैः ज्ञायते सर्वविद्यानां मुखं व्याकरणं नरैः सदा। अहं तुत्वां वर्षषट्केन तद् शिक्षयामि। एतच्छ्रुत्वा सहसा शर्ववर्मा सेर्ष्यं किलावदत् सुखोचितो जनः कथं चिरमियत् क्लेशं कुर्यादहं त्वां तद् मासषट्केन शिक्षयामि। एतदसम्भाव्यं श्रुत्वाहं रुषा तमवोचम् षड्भिमासैस्त्वया देवः शिक्षितश्चेत्ततो मया संस्कृतं प्राकृतं तद्वद्देशभाषा च भाषात्रयमिदं सर्वदा त्यक्तम्। शर्ववर्मा ततोऽवादीच्चेदेवं न करोम्यहं तव पादुके द्वादशाब्दान् वहामीत्युक्त्वा तस्मिन् निगर्तेऽहमपि गृहमगमम्। स राजाप्युभयतः सिद्धिं मत्वाश्वस्तो बभूव। शर्ववर्मा तां सुदुस्तरां प्रतिज्ञां पश्यन् सानुशयः स्वभार्यायै तत्सर्वं शशंस।

दुःखिता सापि तमवोचत्– प्रभो! संकटेऽस्मिन् स्वामिकुमारेण बिना तव गतिरन्या न दृश्यते। तथेति निश्चयं कृत्वा निशि पश्चिमे प्रहरे शर्ववर्मा निराहारस्तत्रैव प्रस्थितोऽभवत्। ततः सिंहगुप्ताख्यो राजपुत्रो राजानमब्रवीत्– देव! त्वयि खिन्ने तदा मे महान् निर्वेदोऽभूत्। ततः ते श्रेयोनिमित्तं चाण्डिकाग्रे निजः शिरः छेत्तुं प्रारब्धवानस्मि। "मैवं कृथा नृपस्येच्छा सेत्स्यति सेत्स्यत्येव इत्यवारयत् वागन्तरिक्षात् ते सिद्धिरस्ति।" इत्युक्त्वा नृपमामन्त्र्य सत्वरं सः सिंहगुप्तः शर्ववर्मणः पश्चाच्चारद्वयं व्यसर्जयत्। सोऽपि शर्ववर्मा वातैकभक्षः सन्कृतमौनः सुनिश्चयः क्रमात् स्वामिकुमारस्यान्तिकं प्राप। शरीरनिक्षेपेण तपसा तोषितः कार्तिकेयो यथेप्सितं प्रसादमकरोत्। ततो सिंहगुप्तविशिष्टाभ्यां चाराभ्यां आगति शर्ववर्मणः उदयः राज्ञे निवेदितः।

अथ कुमारवरसिद्धिमान् शर्ववर्मा आगत्य चिन्तितोपस्थिता सर्वा विद्याः राज्ञे प्रदत्तवान्। तत्क्षणं तास्तस्य सातवाहनभूपतेः प्रादुरासंश्च पारमेश्वरः प्रसादः किं न कुर्याद्धि। अथ राज्ञः तमखिलं विद्यालाभमाकर्ण्य प्रमुदितवति राष्ट्रे कोऽप्युत्सवोऽभूत्। तेन प्रणतेन राज्ञा राजार्हरत्ननिचयैः शर्ववर्मा गुरुरित्यर्चितः नर्मदायाः कूलोपकण्ठविनिवेशिनि भरुकच्छनाम्नि विषये स्वामीकृतश्च। विद्यागमे कारणं विष्णुशक्तितनयां तां राज्ञीमपि प्रीत्या देवीनामुपरि कृतवान्।

# अभ्यास प्रश्न

1. निम्नलिखित प्रश्नों के उत्तर संस्कृत में लिखिए–
   (क) स्वप्ने भगवानिन्दुशेखर: राजानं किमादिदेश?
   (ख) सिंह: राजानम् किमवदत्? **(2018HQ, HR)**
   (ग) सिंहारूढं बालकम् दृष्ट्वा राजा किमकरोत्?
   (घ) 'मोदकैर्देव' इत्यस्य क: अभिप्राय:?
   (ङ) शर्ववर्मण: भार्या स्वपतये किं न्यवेदयत्?
   (च) राजा सातवाहन: कथं सर्वा: विद्या: प्राप्तवान्?
   (छ) दीपकर्णे: भार्याया: किं नाम आसीत्?
   (ज) कथासरित्सागरस्य रचयिता क: आसीत्? **(2020MQ)**
2. 'ज्ञानं पूततरं सदा' पाठ का सारांश लिखिए।
3. पाठ के आधार पर शर्ववर्मा का चरित्र-चित्रण कीजिए। **(2019AQ, AT)**
4. 'ज्ञानं पूततरं सदा' पाठ के आधार पर राजा सातवाहन का चरित्र-चित्रण कीजिए। **(2019AO,AP,AS,20MO,MP,MT,MU)**

# वस्तुनिष्ठ प्रश्न

**निम्न चार विकल्पों में से सही विकल्प का चयन कीजिए–**

1. **सातवाहन क: आसीत्–**
   (क) नृप: (ख) सेनापति:
   (ग) मन्त्रि: (घ) राजनीतिज्ञ:
2. **शर्ववर्मा सातवाहनस्य आसीत्–**
   (क) भृत्य: (ख) मन्त्रि:
   (ग) सेनापति: (घ) मित्र:
3. **सातवाहनस्य प्रमुख विशेषता–**
   (क) विद्वता (ख) निष्ठुरता
   (ग) शौर्य (घ) उदारता
4. **सरस्वती विराजते–**
   (क) मयूरे (ख) कमले
   (ग) सिंहे (घ) हंसे
5. **कथासरित्सागरस्य ............... रचयितास्ति।**
   (क) बल्लालसेन: (ख) विष्णुशर्मा
   (ग) सोमदेव: (घ) विशाखदत्त:
6. **शर्ववर्मा सातवाहनस्य ............... आसीत्।**
   (क) मन्त्री (ख) भृत्य:
   (ग) सेनापति:

## ➡ आन्तरिक मूल्यांकन

पाठ से पाँच शब्दों को छाँटकर उनका सन्धि विच्छेद कीजिए तथा सन्धि का नाम लिखिए।

●